"दुहितॄणामभावे तु रिक्थं पुत्त्रेषु तद्भवेत् ॥"
इति मनुवचनात् ॥

एवं पुत्त्राधिकारात् प्राक् दुहित्रधिकारविधायकवचनान्तराण्येतद्विषयकाणि । पुत्त्राद्यभावे तु ब्राह्मादिपञ्चकविवाहकालीनं स्त्रीधनं भर्त्तुः । आसुरादित्रयविवाहकालीनन्तु मातुः तदभावे पितुः । यथा मनुः ।

"ब्राह्मदैवार्षगान्धर्व्वप्राजापत्येषु यद्धनम् ।
अतीतायामप्रजायां भर्त्तुरेव तदिष्यते ॥
यत्तस्याः स्यात् धनं दत्तं विवाहेष्वासुरादिषु ।
अतीतायामप्रजायां मातापित्रोस्तदिष्यते ॥"

कन्याधनाधिकारि क्रममाह बौधायनः ।

"रिक्थं मृतायाः कन्याया गृह्णीयुः सोदराः
स्वयम् ।
तदभावे भवेन्मातुस्तदभावे भवेत् पितुः ॥"

अत्र क्रमदर्शनात् पूर्व्ववचने मातापित्रोरित्यत्र पाठक्रमेणाधिकारो न तु द्वन्द्वनिर्द्देशात् समुच्चितेन । बृहस्पतिः ।

"मातृष्वसा मातुलानी पितृव्यस्त्री पितृष्वसा
श्वश्रूः पूर्व्वजपत्नी च मातृतुल्याः प्रकीर्त्तिताः ॥
यदासामौरसो न स्यात् सुतो दौहित्र एव वा ।
तत्सुतो वा धनं तासां स्वस्रीयाद्याः समाप्नुयुः ॥"

औरसपदं कन्यापुत्त्रोभयपरम् । सुत इति सपत्नीपुत्त्रपरम् ।

"सर्व्वासामेकपत्नीनामेका चेत् पुत्त्रिणी भवेत्
सर्व्वास्तास्तेन पुत्त्रेण प्राह पुत्त्रवतीर्म्मनुः ॥"
इति मनुस्मृतेः ।

एकपत्नीनामिति एकः पतिर्यासां ताः । न तु सुतपदमौरसविशेषणं वैयर्थ्यात् । सपत्नीपुत्त्रसद्भावे स्वस्रीयाद्यधिकारापत्तेश्च । तत्सुत इति पौत्त्रः सपत्नीपौत्त्रपरं न तु दौहित्रपुत्त्रपरं तस्य स्वभोग्यभर्त्तृपिण्डदानानधिकारात् । अत्र प्रागुक्तानुसारात् दौहित्रपर्य्यन्तानन्तरमेव सपत्नीपुत्त्रतत्पुत्त्रयोरधिकारः । न तु प्रागुक्तभर्त्रादिपितृपर्य्यन्ताभावेऽपीति वाच्यं भर्त्रादीनां धनिभोग्यपार्व्वणपिण्डदानानधिकारात् । तस्मादेतेषां सपत्नीपौत्त्रान्तानां तत्सुतो वेति वाशब्दसमुच्चितानाम् ।

"सामान्यं पुत्त्रकन्यानां मृतायां स्त्रीधनं
विदुः ।
अप्रजायां हरेत् भर्त्ता माता भ्राता पितापि
वा ॥"

इति देवलोक्तानां भर्त्रादिपितृपर्य्यन्तानामभाव एव सत्स्वपि श्वशुरभ्रातृश्वशुरादिषु स्वस्रीयाद्या इत्यनेन भगिनीसुतभर्त्तृभागिनेयभर्त्तृज्येष्ठकनिष्ठोभयरूपभ्रातृसुत-स्वभ्रातृपुत्त्र-जामातृ-देवराणां मातृष्वसादिधने अधिकारः । अनन्यगतेर्व्वचनात् । अत्र ।

"त्रयाणामुदकं कार्य्यं त्रिषु पिण्डः प्रवर्त्तते ।
चतुर्थः सम्प्रदातैषां पञ्चमो नोपपद्यते ॥"
इति दायभागप्रकरणीयमनुस्मृतेः ।

पिण्डदोंऽशहर इति याज्ञवल्क्यीयात् । मातृतुल्याः प्रकीर्त्तिता इत्यनेन स्वस्रीयादीनां पुत्त्रत्वज्ञापनेन एकप्रयोजनकत्वात् ।

"मातुलो भागिनेयस्य स्वस्रीयो मातुलस्य च ।
श्वशुरस्य गुरोश्चैव सख्युर्मातामहस्य च ॥
एतेषाञ्चैव भार्य्याभ्यः स्वसुर्मातुः पितुस्तथा ।
पिण्डदानन्तु कर्त्तव्यमिति वेदविदां स्थितिः ।
इति शातातपवचनात् ।

पिण्डदानविशेषेणैव अत्रामेषामधिकारक्रमः प्रतिपत्तव्यः । पाठक्रमादर्थक्रमस्य बलवत्त्वात् । अन्यथा सर्व्वशेषे देवराधिकारे महाजनविरोधः स्यात् । तत्र प्रथमं देवरः तत्पिण्डतद्भर्त्तृपिण्डतद्भर्त्तृदेयपुरुष-त्रय-पिण्डदत्वात् सपिण्डत्वाच्च भ्रातृस्त्रीधने अधिकारी । तदभावे भ्रातृश्वशुरदेवरयोः सुतौ तत्पिण्डतद्भर्त्तृपिण्डतद्भर्त्तृदेयपुरुषद्वयपिण्डदत्वात् सपिण्डत्वाच्च । तयोरभावे त्वसपिण्डोऽपि भगिनीपुत्त्रः तत्पिण्डतत्पुत्त्रदेयतत्पित्रादित्रयपिण्डदत्वात् । तदभावे भर्त्तृभागिनेयः पुत्त्राद्भर्त्तुर्दुर्बलत्वेन तत्स्थानपातिनोरपि भगिनीपुत्त्रभर्त्तृभागिनेययोस्तथैव बलाबलस्य न्याय्यत्वेन तद्भर्त्तृदेयपुरुषत्रयपिण्डदत्वात् तत्पिण्डदत्वात् तद्भर्त्तृपिण्डदत्वाच्च मातुलानीधने अधिकारी । तदभावे भ्रातृपुत्त्रः तत्पिण्डतत्पुत्त्रदेयतत्पित्रादिपिण्डद्वयदत्वात् पितृष्वसृधने अधिकारी । तदभावे श्वशुरयोः पिण्डदानात् जामाता श्वश्रूधने अधिकारीति क्रमः । स्वस्रीयाद्या इति अधिकारिमात्रपरं न पाठिकक्रमपरं एषां अत्रां प्रातिस्विकोक्तानामभावे सपिण्डानन्तर्य्येण श्वशुरादिवदधिकारी न च सपिण्डाभावे मातृष्वसेति वचनं वाच्यं अस्मिन्नधिकारिमध्ये देवरतत्सुतभ्रातृश्वशुरसुतानामधिकारज्ञापनादासन्नतरश्वशुरभ्रातृश्वशुरादेः परित्यागादिति । इति दायतत्त्वम् ॥

स्त्रीधर्म्मः, पुं, ( स्त्रिया धर्म्मः । ) ऋतुः । तत्पर्य्यायः । पुष्पम् २ आर्त्तवम् ३ रजः ४ । इति हेमचन्द्रः ॥ (मैथुनम् । यथा हरिवंशे । ८४ । ६१ ।

"शृण्वती कामजननीर्व्वाचः श्रोत्रसुखावहाः ।
बर्हिणाञ्चैव विरुतं खगानाञ्च विकूजितम् ॥
अभीक्ष्णमभिशृण्वन्ती स्त्रीधर्म्मं सा व्यरोचयत् ॥"

स्त्रीणां शुभकर्म्मादिः । यथा, मनुः । १।११४।
"स्त्रीधर्म्मयोगं तापस्यं मोक्षं सन्न्यासमेव च ॥")

स्त्रीधर्म्मिणी, स्त्री, ( स्त्रीधर्म्मोऽस्या अस्तीति । इनिः । ङीप् । ) ऋतुमती । इत्यमरः । २ । ६ । २० ॥ (यथा, महाभारते । २।७७ । १४ ।
"स्त्रीधर्म्मिणी वरारोहा शोणितेन परिप्लुता ।
एकवस्त्राथ पाञ्चाली पाण्डवानभ्यवैक्षत ॥")
अस्य विवरणं रजस्वलाशब्दे द्रष्टव्यम् ॥

स्त्रीधवः,पुं, (स्त्रीणां धवः प्रियः ।) पुरुषः । इति जटाधरः ॥

स्त्रीपरः, पुं, ( स्त्रीषु परः निरतः । ) विड्गः । कामुकः । इति केचित् ॥

स्त्रीपण्योपजीवी, [न्] पुं, (स्त्रीपण्येन उपजीवतीति । उप+जीव+णिनिः ।) सम्भोगार्थमन्यस्मै स्त्रियं दत्त्वा तद्धनोपजीवी । इति महाभारते दानधर्म्मः ॥

स्त्रीपुंधर्म्मः, पुं, (स्त्री च पुमांश्च स्त्रीपुंसौ । तयोर्धर्म्मः । ) स्त्रीपुंसयोर्व्यवहारः । स च अष्टादशविवादपदान्तर्गतविवादविशेषः । यथा,—

"स्त्रीपुंधर्म्मो विभागश्च द्यूतमाह्वयमेव च ।
पदान्यष्टादशैतानि व्यवहारस्थिताविह ॥"
इति मानवे ८ अध्यायः ॥

तद्विवरणं यथा,—

"पुरुषस्य स्त्रियाश्चैव धर्म्मे वर्त्मनि तिष्ठतोः ।
संयोगे विप्रयोगे च धर्म्मान् वक्ष्यामि शाश्वतान्
अस्वतन्त्राः स्त्रियः कार्य्याः पुरुषैः स्वैर्दिवानिशम् ॥
विषयेषु च सज्जन्त्यः संस्थाप्या आत्मनो वशे ॥
पिता रक्षति कौमारे भर्त्ता रक्षति यौवने ।
रक्षन्ति स्थविरे पुत्त्रा न स्त्री स्वातन्त्र्यमर्हति ॥
कालेऽदाता पिता वाच्यो वाच्यश्चानुपयन् पतिः
मृते भर्त्तरि पुत्त्रस्तु वाच्यो मातुररक्षिता ॥
सूक्ष्मेभ्योऽपि प्रसङ्गेभ्यः स्त्रियो रक्ष्या विशेषतः
द्वयोर्हि कुलयोः शोकमावहेयुररक्षिताः ॥
इमं हि सर्व्ववर्णानां पश्यन्तो धर्म्ममुत्तमम् ।
यतन्ते रक्षितुं भार्य्यां भर्त्तारो दुर्ब्बला अपि ॥
स्वां प्रसूतिं चरित्रञ्च कुलमात्मानमेव च ।
स्वञ्च धर्म्मं प्रयत्नेन जायां रक्षन् हि रक्षति ॥
पतिर्भार्य्यां संप्रविश्य गर्भो भूत्वेह जायते ।
जायायास्तद्धि जायात्वं यदस्यां जायते पुनः ॥
यादृशं भजते हि स्त्री सुतं सूते तथाविधम् ।
तस्मात् प्रजाविशुद्ध्यर्थं स्त्रियं रक्षेत् प्रयत्नतः ॥
न कश्चित् योषितः शक्तः प्रसह्य परिरक्षितुम् ।
एतैरुपाययोगैस्तु शक्यास्ताः परिरक्षितुम् ॥
अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत् ।
शौचे धर्म्मेऽन्नपक्त्याञ्च पारिणाह्यस्य वेक्षणे ॥
अरक्षिता गृहे रुद्धाः पुरुषैराप्तकारिभिः ।
आत्मानमात्मना यास्तु रक्षेयुस्ताः सुरक्षिताः ॥
पानं दुर्ज्जनसंसर्गः पत्या च विरहोऽटनम् ।
स्वप्नोऽन्यगेहवासश्च नारीसंदूषणानि षट् ॥
नैता रूपं परीक्षन्ते नासां वयसि संस्थितिः ।
सुरूपं वा विरूपं वा पुमानित्येव भुञ्जते ॥
पौंश्चल्याच्चलचित्ताच्च नैःस्नेह्याच्च स्वभावतः ।
रक्षिता यत्नतोऽपीह भर्त्तृष्वेता विकुर्व्वते ॥
एवं स्वभावं ज्ञात्वासां प्रजापतिनिसर्गजम् ।
परमं यत्नमातिष्ठेत् पुरुषो रक्षणं प्रति ॥
शय्यासनमलङ्कारं कामं क्रोधमनार्ज्जवम् ।
द्रोहभावं कुचर्य्याञ्च स्त्रीभ्यो मनुरकल्पयत् ॥
नास्ति स्त्रीणां क्रिया मन्त्रैरिति धर्म्मो व्यवस्थितः
निरिन्द्रिया ह्यमन्त्राश्च स्त्रियोऽनृतमिति स्थितिः
तथा च श्रुतयो बह्व्यो निगीता निगमेष्वपि ।
स्वालक्षण्यपरीक्षार्थं तासां शृणुत निष्कृतीः ॥
यन्मे माता प्रलुलुभे विचरन्त्यपतिव्रता ।
तन्मे रेतः पिता वृङ्क्तामित्यस्यैतन्निदर्शनम् ॥
ध्यायत्यनिष्टं यत्किञ्चित् पाणिग्राहस्य चेतसा